(यथा मनुः । २।६८ ।
"उत्पत्तिव्यञ्जकः पुण्यः कर्म्मयोगं निबोधत" ।) (साङ्ख्यादिमते आविर्भावः। यथा, मृत्पिण्डे विद्यमानस्य घटस्याविर्भाव एव उत्पत्तिर्यथा तथैव कारणात्मना विद्यमानानां तत्त्वानां आविर्भाव एवोत्पत्तिर्विवक्षिता ॥)

उत्पन्नः, त्रि, (उत् + पद् + क्त ।) उत्पत्तिविशिष्टः । जातः । उद्भूतः ॥

उत्पलं, क्ली, (उत्पलतीति । पल गतौ पचाद्यच् ।) नीलकमलम् । कुष्ठौषधिः । इति विश्वः ॥ पुष्पम् । इति मेदिनी ॥ जलजपुष्पमात्रम् । तच्च पद्मकुमुदादि । तत्पर्य्यायः । कुवलयम् २ । इत्यमरः ॥ कुवलम् ३ । इति जटाधरः ॥ कुवेलम् ४ । इति शब्दरत्नावली ॥ (यथा रघौ ३।३६ । "नवावतारं कमलादिवोत्पलम्" ।) तस्य गुणाः । कषायत्वम् । मधुरत्वम् । शीतत्वम् । पित्तकफरक्तनाशित्वञ्च । इति राजवल्लभः ॥ जलपुष्पविशेषः । कोञ्चि इति हिन्दी भाषा । तत्पर्य्यायः । अनुष्णम् २ रात्रिपुष्पम् ३ जलाक्रयम् ४ हिमाब्जम् ५ निशापुष्पम् ६ । अस्य गुणाः । शीतत्वम् । स्वादुत्वम् । पित्तरक्तार्त्तिदोषनाशित्वम् । दाहश्रमवमिभ्रान्तिकृमिज्वरहरत्वञ्च । इति राजनिर्घण्टः ॥ ("उत्पलानि कषायाणि पित्तरक्तहराणि च" । इति सूत्रस्थाने सप्तविंशेऽध्याये चरकेणोक्तम् ॥ "तस्मादल्पान्तरगुणे विद्यात्कुवलयोत्पले" । इति सुश्रुते सूत्रस्थाने षट्चत्वारिंशत्तमोऽध्यायः ॥)

उत्पलः, त्रि, (उद्गतं पलं मांसं यस्मात् सः ।) मांसशून्यः । इति विश्वः हेमचन्द्रश्च ॥

उत्पलगन्धिकं, क्ली, (उत्पलस्य गन्धइव गन्धो यस्य । समासे इत् संज्ञायां कन् ।) चन्दनविशेषः । तत्पर्य्यायः । कृष्णताम्रम् २ गोशीर्षम् ३ । इति शब्दमाला ॥

उत्पलपत्रं, क्ली, (उत्पलस्य पत्रम् । नखक्षतपक्षे पत्रमिव ।) कुवलयदलम् । (यथा विष्णुपुराणे १।४।२६ ।
ततः समुत्क्षिप्य धरां स्वदंष्ट्रया
महावराहः स्फुटपद्मलोचनः ।
रसातलादुत्पलपत्रसन्निभः
समुत्थितो नील इवाचलो महान् ॥)
स्त्रीनखक्षतम् । इति हेमचन्द्रः ॥ तिलकम् । इति धरणी ॥

उत्पलशारिवा, स्त्री, (उत्पलमस्त्यस्याः उत्पलाकारपुष्पत्वात् । अर्श आद्यच् । यद्वा उद्गतं पलमनया । ततः उत्पला चासौ शारिवा चेति ।) श्यामलता । इत्यमरः ।(श्यामलताशब्देऽस्या गुणादिकं ज्ञेयम् ॥)

उत्पलिनी, स्त्री, (उत्पलानि सन्ति अस्यां तेषां समूहो वा । उत्पल + इनि + ङीप् ।) पद्मसमूहः । इति शब्दरत्नावली ॥ जलपुष्पविशेषः । कोटी कोञ्चि इति हिन्दी भाषा । तत्पर्य्यायः । कैरविणी २ कुमुद्वती ३ कुमुदिनी ४ चन्द्रेष्टा ५ कुवलयिनी ६ इन्दीवरिणी ७ नीलोत्पलिनी ८ । (यथा महाभारते तीर्थयात्रापर्व्वणि ३।६६।२५ ।
"वक्षधे सा महाराज बिभ्रती रूपमुत्तमम् ।
अश्विनोत्पलिनी शीघ्रमग्नेरिव शिखा शुभा" ॥)

अस्या गुणाः । हिमत्वम् । तिक्तत्वम् । रक्तामयपित्तनाशित्वम् । वातकफकासतृष्णाश्रमवमिभ्रमताकारित्वञ्च । तस्या वीजगुणाः । स्वादुत्वम् । रूक्षत्वम् । हिमत्वम् । गुरुत्वञ्च । इति राजनिर्घण्टः ॥

उत्पली, स्त्री, तुषचर्पटी । इति मेदिनी । तुँसेर चापड़ा इति भाषा ॥

उत्पवनं, क्ली, (उत् + पू + ल्युट् ।) कुशखण्डिकायां पवित्रमध्येन जलादेरुत्क्षेपणम् । तत्र क्रमः । "पवित्रद्वयमग्रे वामहस्तानामिकाङ्गुष्ठाभ्यां मूले दक्षिणहस्तानामिकाङ्गुष्ठाभ्यां उत्तानहस्ताभ्यां गृहीत्वा आज्ये प्रक्षिप्य तयोर्म्मध्येनाज्यावाज्योत्क्षेपणम्" । इति कालेसिः ॥ "पवित्रद्वयमग्रे दक्षिणहस्तानामिकाङ्गुष्ठाभ्यां मूले वामहस्तानामिकाङ्गुष्ठाभ्यां गृहीत्वा दक्षिणहस्तोपरिभावेन अधोमुखो व्यस्तपाणिः पवित्रमध्येन प्रोक्षणीजलस्य किञ्चिदुत्तोलनम्" । इति पशुपतिः ॥ "पशुपत्युक्तक्रमेण सामगानां मन्त्रोच्चारणपूर्व्वकं पवित्रद्वयमध्येनाज्यावाज्योत्क्षेपणं ॥ इति भवदेवभट्टः ॥

उत्पश्यः, त्रि, (उदूर्द्ध्वं पश्यतीति + उत् + दृश् + श ।) उन्मुखः । ऊर्द्ध्वदृष्टिविशिष्टः । इति हेमचन्द्रः ॥

उत्पाटनं, क्ली, (उत् + पट + णिच् + ल्युट् ।) उलनम् । मूल उपड़ान इति भाषा ॥ (यथा सुश्रुते । "निखातोत्पाटनं भङ्गः पतनं निर्गमस्तथा" ॥)

उत्पाटितं, त्रि, (उत् + पट + णिच् + क्त ।) कृतोत्पाटनं । तत्पर्य्यायः । उन्मूलितम् २ उत्खातम् ३ । इति जटाधरः ॥ आवर्हितम् ४ उद्धृतम् ५ । इति हेमचन्द्रः ॥

उत्पातः, पुं, (उत् + पत् + घञ् ।) उत्पतति अकस्मादायाति यः । प्राणिनां शुभाशुभसूचकमहाभूतविकारभूकम्पादिः । इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः । अजन्यम् २ उपसर्गः ३ । इत्यमरः ॥ स त्रिविधः । दिव्यः १ यथा अपर्व्वणि चन्द्रादित्यग्रासादिः । आन्तरीक्ष्यः २ यथा, उल्कापातनिर्घातादिः । भौमः ३ यथा भूकम्पादिः । इति दीपिकाचण्डीटीके ॥ (उत्पातानां लक्षणादिकं ऋतौ स्वभावप्रभवात् अदोषत्वश्चोक्तं वृहत्संहितायां ४६ अध्याये । यथा,—
"नरपतिदेशविनाशे केतोरुदयेऽथवा ग्रहेऽर्केन्द्वोः।
उत्पातानां प्रभवः स्वर्तुभवश्चाप्यदोषाय ॥ ८२ ॥
येच न दोषान् जनयन्त्युत्पातास्तानृतुस्वभावकृतान्।
ऋषिपुत्रकृतैः श्लोकैर्विद्यादेतैः समासोक्तैः ॥८३॥
वज्राशनिमहीकम्पसन्ध्यानिर्घातनिःस्वनाः ।
परिवेशरजोधूमरक्तार्कास्तमनोदयाः ॥ ८४ ॥
द्रुमेभ्योऽन्नरसस्नेहवहुपुष्पफलोद्गमाः ।
गोपक्षिमदवृद्धिश्च शिवाय मधुमाधवे ॥८५॥
तारोल्कापातकलुषं कपिलार्केन्दुमण्डलम् ।
अनग्निज्वलनस्फोटधूमरेण्वनिलाहतम् ॥ ८६ ॥
रक्तपद्मारुणं सान्ध्यं नभः क्षुब्धार्णवोपमम् ।
सरितां चाम्बुसंशोषं दृष्ट्वा ग्रीष्मे शुभं वदेत् ॥८७॥
शक्रायुधपरीवेषविद्युच्छुष्कविरोहणम् ।
कम्पोद्वर्त्तनवैकृत्यं रसनं दरणं क्षितेः ॥ ८८ ॥
सरोनद्युदपानानां वृद्ध्यूर्द्ध्वतरणप्लवाः ।
सरणं चाद्रिगेहानां वर्षासु न भयावहम् ॥८६॥
दिव्यस्त्रीभूतगन्धर्व्वविमानाद्भुतदर्शनम् ।
ग्रहनक्षत्रताराणां दर्शनं च दिवाम्बरे ॥ ९० ॥
गीतवादित्रनिर्घोषा वनपर्व्वतसानुषु ।
शस्यवृद्धिरपां हानिरपापाः शरदि स्मृताः ॥९१॥
शीतानिलतुषारत्वं नर्दनं मृगपक्षिणाम् ।
रक्षोयक्षादिसत्वानां दर्शनं वागमानुषी ॥९२॥
दिशो धूमान्धकाराश्च सनभोवनपर्व्वताः ।
उच्चैः सूर्य्योदयास्तौ च हेमन्ते शोभनाः स्मृताः॥९३॥
हिमपातानिलोत्पातविरूपाद्भुतदर्शनम् ।
कृष्णाञ्जननिभाकाशं तारोल्कापातपिञ्जरम् ॥९४॥
चित्रगर्भोद्भवाः स्त्रीषु गोऽजाश्वमृगपक्षिषु ।
पत्राङ्कुरलतानाञ्च विकाराः शिशिरे शुभाः ॥९५॥
ऋतुस्वभावजा ह्येते दृष्टाः स्वर्त्तौ शुभप्रदाः ।
ऋतोरन्यत्र चोत्पाता दृष्टास्ते भृशदारुणाः ॥९६॥
उन्मत्तानाञ्च या गाथाः शिशूनां भाषितञ्च यत् ।
स्त्रियो यच्च प्रभाषन्ते तस्य नास्ति व्यतिक्रमः॥९७॥
पूर्व्वं चरति देवेषु पश्चात् गच्छति मानुषान् ।
नचोदिता वाग्वदति सत्या ह्येषा सरस्वती ॥९८॥
उत्पातान् गणितविवर्जितोऽपि बुद्धा
विख्यातो भवति नरेन्द्रवल्लभश्च ।
एतत्तन्मुनिवचनं रहस्यमुक्तं
यज्ज्ञात्वा भवति नरस्त्रिकालदर्शी" ॥ ९९ ॥
उत्पतनं । उल्लम्फः । यथा, रामायणे ५।६८।२३ ।
"एकोत्पातेन ते लङ्कामेष्यन्ति हरिपुङ्गवाः" ।
उन्नतिः । वृद्धिः । यथा, हितोपदेशे ।
"करनिहितकन्दुकसमाः पातोत्पाता मनुष्याणां"।
उत्पत्तिः । यथा, महाभारते, वनपर्व्वणि ।
"बुद्धिरात्मानुगातीव उत्पातेन विधीयते ।
तदाश्रिता हि सा ज्ञेया बुद्धिस्तस्यैषिणी भवेत्"॥)

उत्पादकः, पुं, (उत् + पद + णिच् + ण्वुल् ।) पशुविशेषः । तत्पर्य्यायः । शरभः २ कुञ्जराराति: ३ अष्टपादः ४ । इति हेमचन्द्रः ॥

उत्पादकः, त्रि, (उत्पादयतीति । उत् + पद् + णिच् + ण्वुल् ।) उत्पादयिता । जनकः । यथा मनुः ।
"उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता" । २ । १४६ ॥

उत्पादनं, क्ली, (उत् + पद् + णिच् + ल्युट् ।) जननम् । उत्पन्नकरणम् । इति व्याकरणम् ॥(यथा मनुः।९।२७।)
"उत्पादनमपत्यस्य जातस्य परिपालनम्" ।

उत्पादशयनः, पुं स्त्री, (उत्पाद ऊर्द्ध्वपादः सन् शेते यः सः । उत्पाद + शी + ल्यु ।) टिट्टिभपक्षी । इति हेमचन्द्रः ॥

उत्पादिका, स्त्री, (उत् + पद् + णिच् + ण्वुल् + टाप् ।) देहिकानामकीटः । इति त्रिकाण्डशेषः ॥ हिलमोचिका इति शब्दचन्द्रिका ॥ पूतिका । इति भरतो द्विरूपकोषश्च ॥

उत्पाली, स्त्री, (उत् + पल् + घञ् + ङीष् ।) आरोग्यम् । इति शब्दचन्द्रिका ॥

उत्पिञ्जलः, त्रि, (उदतिशयः पिञ्जलो व्यग्रः ।) भृशमाकुलः । अतिशयव्याकुलः । तत्पर्य्यायः । समुत्पिञ्जः २ पिञ्जलः ३ । इति हेमचन्द्रः ॥